# Shrimad Anjaneya Ashtottarashatanamastotram

# શ્રીમદાઞ્જનેયાષ્ટોત્તરશતનામસ્તોત્રમ્ કાલિકારહસ્યતઃ

## Document Information

Text title : Anjaneya AshtottarashatanAmastotram

File name : hanuman108str.itx

Category : aShTottarashatanAma, hanumaana, stotra

Location : doc_hanumaana

Author : Traditional

Transliterated by : From Hanumatstavamanjari

Description-comments : 108 names of Hanuman. From kAlikArahasya, See corresponding nAmAvalI

Latest update : September 14, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 19, 2024

*sanskritdocuments.org*

# શ્રીમદાઞ્જનેયાષ્ટોત્તરશતનામસ્તોત્રમ્ કાલિકારહસ્યતઃ

શ્રીગણેશાય નમઃ ॥

ૐ મનોજવં મારુતતુલ્યવેગં
જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં
શ્રીરામદૂતં શિરસા નમામિ ॥

ૐ આઞ્જનેયો મહાવીરો હનુમાન્મારુતાત્મજઃ ।
તત્ત્વજ્ઞાનપ્રદઃ સીતાદેવીમુદ્રાપ્રદાયકઃ ॥ ૧॥

અશોકવનિકાચ્છેત્તા સર્વમાયાવિભઞ્જનઃ ।
સર્વબન્ધવિમોક્તા ચ રક્ષોવિધ્વંસકારકઃ ॥ ૨॥

પરવિદ્યાપરીહારઃ પરશૌર્યવિનાશનઃ ।
પરમન્ત્રનિરાકર્તા પરયન્ત્રપ્રભેદકઃ ॥ ૩॥

સર્વગ્રહવિનાશી ચ ભીમસેનસહાયકૃત્ ।
સર્વદુઃખહરઃ સર્વલોકચારી મનોજવઃ ॥ ૪॥

પારિજાતદ્રુમૂલસ્થઃ સર્વમન્ત્રસ્વરૂપવાન્ ।
સર્વતન્ત્રસ્વરૂપી ચ સર્વયન્ત્રાત્મકસ્તથા ॥ ૫॥

કપીશ્વરો મહાકાયઃ સર્વરોગહરઃ પ્રભુઃ ।
બલસિદ્ધિકરઃ સર્વવિદ્યાસમ્પત્પ્રદાયકઃ ॥ ૬॥

કપિસેનાનાયકશ્ચ ભવિષ્યચ્ચતુરાનનઃ ।
કુમારબ્રહ્મચારી ચ રત્નકુણ્ડલદીપ્તિમાન્ ॥ ૭॥

સઞ્ચલદ્વાલસન્નદ્ધલમ્બમાનશિખોજ્જ્વલઃ ।
ગન્ધર્વવિદ્યાતત્ત્વજ્ઞો મહાબલપરાક્રમઃ ॥ ૮॥

કારાગૃહવિમોક્તા ચ શૃઙ્ખલાબન્ધમોચકઃ ।

સાગરોત્તારકઃ પ્રાજ્ઞો રામદૂતઃ પ્રતાપવાન્ ॥ ૯॥

વાનરઃ કેસરિસુતઃ સીતાશોકનિવારકઃ ।
અઞ્જનાગર્ભસમ્ભૂતો બાલાર્કસદૃશાનનઃ ॥ ૧૦॥

વિભીષણપ્રિયકરો દશગ્રીવકુલાન્તકઃ ।
લક્ષ્મણપ્રાણદાતા ચ વજ્રકાયો મહાદ્યુતિઃ ॥ ૧૧॥

ચિરઞ્જીવી રામભક્તો દૈત્યકાર્યવિઘાતકઃ ।
અક્ષહન્તા કાઞ્ચનાભઃ પઞ્ચવક્ત્રો મહાતપાઃ ॥ ૧૨॥

લઙ્કિણીભઞ્જનઃ શ્રીમાન્ સિંહિકાપ્રાણભઞ્જનઃ ।
ગન્ધમાદનશૈલસ્થો લઙ્કાપુરવિદાહકઃ ॥ ૧૩॥

સુગ્રીવસચિવો ધીરઃ શૂરો દૈત્યકુલાન્તકઃ ।
સુરાર્ચિતો મહાતેજા રામચૂડામણિપ્રદઃ ॥ ૧૪॥

કામરૂપી પિઙ્ગલાક્ષો વાર્ધિમૈનાકપૂજિતઃ ।
કબલીકૃતમાર્તણ્ડમણ્ડલો વિજિતેન્દ્રિયઃ ॥ ૧૫॥

રામસુગ્રીવસન્ધાતા મહારાવણમર્દનઃ ।
સ્ફટિકાભો વાગધીશો નવવ્યાકૃતિપણ્ડિતઃ ॥ ૧૬॥

ચતુર્બાહુર્દીનબન્ધુર્મહાત્મા ભક્તવત્સલઃ ।
સઞ્જીવનનગાહર્તા શુચિર્વાગ્મી દૃઢવ્રતઃ ॥ ૧૭॥

કાલનેમિપ્રમથનો હરિમર્કટમર્કટઃ ।
દાન્તઃ શાન્તઃ પ્રસન્નાત્મા શતકણ્ઠમદાપહૃત્ ॥ ૧૮॥

યોગી રામકથાલોલઃ સીતાન્વેષણપણ્ડિતઃ ।
વજ્રદંષ્ટ્રો વજ્રનખો રુદ્રવીર્યસમુદ્ભવઃ ॥ ૧૯॥

ઇન્દ્રજિત્પ્રહિતામોઘબ્રહ્માસ્ત્રવિનિવારકઃ ।
પાર્થધ્વજાગ્રસંવાસી શરપઞ્જરભેદકઃ ॥ ૨૦॥

દશબાહુર્લોકપૂજ્યો જામ્બવત્પ્રીતિ વર્ધનઃ ।
સીતાસમેત શ્રીરામભદ્રપૂજાધુરન્ધરઃ ॥ ૨૧॥

ઇત્યેવં શ્રીહનુમતો નામ્નામષ્ટોત્તરં શતમ્ ॥

યઃ પઠેચ્છૃણુયાન્નિત્યં સર્વાન્કામાનવાપ્નુયાત્ ॥ ૨૨॥

॥ ઇતિ શ્રીમદાઞ્જનેયાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shrimad Anjaneya Ashtottarashatanamastotram*

pdf was typeset on July 19, 2024

Please send corrections to *sanskrit@cheerful.com*